अन्धक उवाच ।
अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता ।
वन्दामि चरणौ मातुर्वन्दनीया ममाम्बिका ॥
वरदोऽसि यदीशान ! तद्गुयातु विलयं मम ।
शारीरं मानसं वागजं दुष्कृतं दुर्विचिन्तितम् ॥
तथा मे दानवो भावो व्यपयातु महेश्वर ! ।
स्थिरा स्यात्तव भक्तिस्तु वरमेतं प्रयच्छ मे ॥
महेश्वर उवाच ।
एवं भवतु दैत्येन्द्र ! पापं ते यातु संक्षयम् ।
मुक्तोऽसि दैत्यभावाच्च भृङ्गी गणपतिर्भव ॥
इत्येवमुक्त्वा वरदः शूलाग्रादवतार्य्य तम् ।
निर्म्माज्य निजहस्तेन चक्रे निर्व्रणमन्धकम् ॥
ततः स्वदेहतो देवान् ब्रह्मादीनाजुहाव सः ।
ते निश्चेरुर्महात्मानो नमस्यन्तस्त्रिलोचनम् ॥
गणान् स नन्दी चाहूय सन्निवेश्य तदग्रतः ।
भृङ्गिणं दर्शयामास त्र्यवन्नेषोऽन्धकेति हि ॥
ते दृष्ट्वा दानवपतिं संशुष्कपिशितं रिपुम् ।
गणाधिपत्यमापन्नं प्रशशंसुर्वृषध्वजम् ॥"
इति वामनपुराणे ।४४।४५।६७ अध्यायेभ्यः सङ्कलितम् ॥

भृङ्गीफलः, पुं, ( भृङ्ग्याः अतिविषायाः फलमिव फलं यस्य । ) आम्रातकवृक्षः । इति राजनिर्घण्टः ॥

भृङ्गीशः, पुं, ( भृङ्गिणो भृङ्गेर्वा ईशः । ) महादेवः । इति शब्दरत्नावली ॥

भृङ्गेरिटिः, पुं, ( भृङ्गे भृङ्गविषये रिटति । अभिलषतीति । भृङ्गे+रिट् कर्त्तरि इः । अलुक् समासः । ) भृङ्गी । इति त्रिकाण्डशेषः ॥

भृङ्गेष्टा, स्त्री, ( भृङ्गाणामिष्टा । ) घृतकुमारी । भार्गी । तरुणी । काकजम्बूः । इति राजनिर्घण्टः ॥

भृज ई ङ भर्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) भर्जनं पाकविशेषः । ई भृक्तः । ङ भर्जते तण्डुलान् जनः । इति दुर्गादासः ॥

भृज्जनः, पुं, ( भृज्यन्ते तण्डुलादयोऽस्मिन्निति । भ्रस्ज+ "भूसूधूभ्रस्जिभ्यश्छन्दसि ।" उणा० २ । ८० । इति क्युन् । ) अम्बरीषः । इति उणादिकोषः । भाजना खोला इति भाषा ॥

भृतः, त्रि, भरणीयः । इत्याह्निकतत्त्वम् । पुष्टः । इति भृधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥

भृतकः, पुं, ( भ्रियते इति । भृ+कर्म्मणि क्तः । ततः स्वार्थे कन् । यद्वा, भृतेन वेतनेन उपजीवतीति कन् । ) वेतनोपजीविकर्म्मकर्त्ता । तत्पर्य्यायः । भृतिभुक् २ कर्म्मकरः ३ वैतनिकः ४ । इत्यमरः । २।१० । १५ ॥ (यथा, मनौ ।३।१५६।
"भृतकाध्यापको यश्च भृतकाध्यापितस्तथा ॥")

भृतिः, स्त्री, ( भ्रियते अनयेति । भृ+क्तिन् । ) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ मूल्यम् । भरणम् । इति मेदिनी । ते, ४२ ॥ भृतिर्वेतनं कृतकर्म्मणे दत्तम् । तत्तु सप्तविधदत्तान्तर्गतदत्तविशेषः । यथा नारदेन च । दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम् ।
"पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥"
इति मिताक्षरा ॥

भृतिभुक्, [ज्] पुं, (भृत्या भुङ्क्ते उपजीवतीत्यर्थः । भुज्+कर्त्तरि क्विप् ।) भृतकः । इत्यमरः । २ । १० । १५ ॥

भृत्यः, पुं, ( भ्रियते इति । भृ+"भृञोऽसंज्ञायाम् ।" ३ । १ । ११२ । इति क्यप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च । ) दासः । इत्यमरः । २ । १० । १७ ॥ ( तथास्य पर्य्यायान्तरम् ।
"परिकर्म्मा परिचरः सहायः परिचारकः ।
प्रेष्यो भव्य उपस्थाता सेवकोऽभिषरोऽनुगः ॥"
इति वैद्यकरत्नमालायाम् ॥)
तस्य लक्षणं यथा,—
सूत उवाच ।
"भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्थेषु त्रिविधेष्वेव कर्म्मसु ॥
भृत्यपरीक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ।
तमिमं संप्रवक्ष्यामि यद्यदा कथितानि च ॥
यथा चतुर्भिः कनकं परीक्ष्यते
तुलाघर्षणच्छेदनतापनेन ।
तथा चतुर्भिर्भृतकः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्म्मणा ॥"
कुलशीलगुणोपेतः सत्यधर्म्मपरायणः ।
रूपेण सुप्रसन्नश्च राज्याध्यक्षो विधीयते ॥
मूल्यरूपपरीक्षाकृद्भवेद्रत्नपरीक्षकः ।
बलाबलपरिज्ञाता सेनाध्यक्षो विधीयते ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी प्रमाथी च प्रतीहारः स उच्यते ॥
मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्व्वशास्त्रसमालोकी ह्येष साधुः स लेखकः ॥
बुद्धिमान् मतिमांश्चैव परचित्तोपलक्षकः ।
क्रूरो यथोक्तवादी च एष दूतो विधीयते ॥
समस्तकृतशास्त्रज्ञः पण्डितोऽथ जितेन्द्रियः ।
शौर्य्यवीर्य्यगुणोपेतो धर्म्माध्यक्षो विधीयते ॥
पितृपैतामहो दक्षः शास्त्रज्ञः सत्यवाचकः ।
शौचयुक्तः सदाचारी सूपकारः स उच्यते ॥
आयुर्व्वेदकृताभ्यासः सर्व्वज्ञः प्रियदर्शनः ।
आर्य्यशीलगुणोपेतो वैद्य एव विधीयते ॥
वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्व्वादपरो नित्यमेष राजपुरोहितः ॥
इति गारुड़े ११२ अध्यायः ॥

भृत्या, स्त्री, (भ्रियतेऽनया भरणमिति वा । भृ+"संज्ञायां समजनिषदनिपतमनविदषुञ् शीङ् भृञिणः ।" ३ । ३ । ९९ । इति क्यप् । स्त्रियां टाप् । ) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ (भरणक्रिया । यथा, ऋग्वेदे । १ । ८४ । १६ ।
"आसन्निषून् हृत्स्वसोमयो भूनय एषां भृत्यामृणधत्स जीवात् ॥" )

भृमिः, पुं, ( भ्रमति भ्राम्यति वेति । भ्रम्+"भ्रमेः संप्रसारणञ्च ।" उणा० ४ । १२० । इति इन् कित् सम्प्रसारणञ्च । ) वायुविशेषः । घूरणा वातास इति भाषा । जलादिभ्रमणम् । इत्युणादिकोषः ॥ ( त्रि, कर्म्मनिर्व्वाहकः । यथा, ऋग्वेदे । १ । ३१ । १६ ।
"आपिः पिता प्रमतिः सोम्यानां
भृमिरस्यृषिकृन्मर्त्यानाम् ॥"
"भृमिर्भ्रामकः कर्म्मनिर्व्वाहक इत्यर्थः ।" इति तद्भाष्ये सायनः ॥ भ्रमणशीलः । यथा, ऋग्वेदे । ३ । ६२ । १ ।
"इमा उवां भृमयो मन्यमाना
युवावते न तुज्या अभूवन् ॥"
"भृमयः भ्रमणशीलाः ॥" इति तद्भाष्ये सायनः ॥
वीणाविशेषे स्त्री । यथा, ऋग्वेदे ।२।३४।१ ।
"अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अपगा अवृण्वत ॥"
"यद्वा, भृम्याख्यो वीणाविशेषस्तं धमन्तो वादयन्तः ॥" इति तद्भाष्ये सायनः ॥ )

भृश, इर् य उ अधःपतने । इति कविकल्पद्रुमः ॥ ( दिवा०-पर०-अक०-सेट् । ) इर् अभृशत् अभर्शीत् । पुषादित्वान्नित्य ङ इत्यन्ये । य भृश्यति भृशत्वरिपताकिनीति हलायुधः ॥ उ भर्शित्वा भृष्ट्वा । इति । दुर्गादासः ॥

भृशं, क्ली, ( भृशति प्राचुर्य्येण वर्त्तते इति भृश+कः । ) अतिशयः । तद्वति, त्रि । इत्यमरः १ । ७० ॥ ( यथा, भारवौ । ११ । ४६ ।
"भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥"

भृशम्, व, ( भृश+कः । ) प्रकर्षार्थः । मुहुरर्थः । शोभनम् । इति शब्दरत्नावली ॥

भृषत्, [द्] पुं, पाषाणः । इति शब्दरत्नावली ॥

भृष्टः, त्रि, ( भ्रस्ज+कर्म्मणि क्तः । ) जलोपसेकं विना पक्वः । इति हेमचन्द्रः ॥ भाजा इति भाषा ॥

भृष्टतण्डुलः, पुं, ( भृष्टश्चासौ तण्डुलश्चेति कर्म्मधारयः । ) भर्जनविशिष्टधान्यनिकरः । चाल भाजा इति भाषा ॥ अस्य गुणाः ।
"सुगन्धिः कफहा रूक्षः पित्तली भृष्टतण्डुलः ॥"
इति राजवल्लभः ॥

भृष्टयवः, पुं, ( भृष्टश्चासौ यवश्चेति । ) भर्ज्जनविशिष्टयवः । यव भाजा इति भाषा । तत्पर्य्यायः । धानाः २ । इत्यमरः ॥ वाट्टकम् ३ । इति शब्दचन्द्रिका ॥ अस्य गुणा धानाशब्दे द्रष्टव्याः ॥

भृष्टान्नं, क्ली, ( भृष्टं अन्नम् । ) भृष्टतण्डुलः । मुड़ि इति भाषा । तत्पर्य्यायः । कुहरम् २ व्याघ्रम् ३ । इति शब्दचन्द्रिका ॥

भृष्टिः, स्त्री, ( भ्रस्ज्+भावे क्तिन् । ) भर्जनम् । शून्यवाटिका । इति मेदिनी । टे, २५ ॥

भृ ग्टि भृतौ । भृजि । भर्त्से । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) ग्टि भृणाति भूर्णः । भूर्णिः । भृजि भर्जने । इति दुर्गादासः ॥